शुद्धिकौमुदी

पाठः १० – ०१.०७.२०१७

सुबन्ताः

© All the content in these slides is the intellectual property of Vyoma Linguistic Labs Foundation.
Replication/reuse in any form without express written permission from the organisation is prohibited.

सुबन्ताः

४१. एतस्य पुस्तकस्य मुद्रणाया उत्तमस्य **कर्गजस्य** उपयोगः कृतः ।

'कर्गजस्य' इत्येतस्य परिहारः वरम् । 'कागदस्य' इति प्रयोगः उचितः । कर्गजशब्दस्य प्रयोगः बहुत्र क्रियमाणः दृश्यते । किन्तु, तस्य व्युत्पत्तिः का इति न ज्ञायते । 'Paper' इत्यर्थः बोधयितुम् इष्टः । तस्मिन् अर्थे 'कागद'शब्दस्य प्रयोगः वरम् । स च शब्दः प्रयुक्तपूर्वः, प्रकृतिप्रत्ययादिविवेकयुक्तः च । 'कागः कागवर्णो मस्यादिः दीयते अत्र' इति विग्रहः ।

प्रयोगो यथा –

भूर्जे वा वसने रक्ते क्षौमे वा तालफलके ।

कागदे वाष्टगन्धेन..... ॥

– मन्त्रकल्पद्रुमः ।

सुबन्ताः

४२. अत्र सर्वाणि **सौविध्यानि** सन्ति ।

अत्र 'आनुकूल्यानि' इति शब्दः, शब्दान्तरं वा प्रयोक्तव्यम् । शोभना विधा सुविधा । ततः स्वार्थे ष्यञि सौविध्यम् इति रूपस्य सिद्धिः । विधा नाम प्रकारः । अत्र प्रकारार्थस्य न कोऽपि सम्बन्धः । अतः, अस्थाने एतस्य शब्दस्य प्रयोगः । आनुकूल्यम् इति प्रयोगः, सौलभ्यम् इति प्रयोगो वा अत्र औचित्यम् आवहति ।

अथवा शिष्टप्रयोगः यदि कोऽपि स्यात् तर्हि इत्थं तस्य समर्थनं शक्यम्– 'सुकरतया विधत्ते इति सुविधः । 'आतश्चोपसर्गे' (पा.सू. ३.१.१३६) इति कः । सुविधस्य भावः सौविध्यम्' इति ।

स्थितस्य गतिः दर्शिता अत्र । तथापि 'आनुकूल्य'शब्दस्य प्रयोगः एव वरम् इत्यत्रैव नैर्भर्यम् अस्माकम् ।

सुबन्ताः

४३. **ग्रामान्तरप्रदेशे** मम गृहम् अस्ति ।

’ग्रामान्तरप्रदेशे’ इति प्रयोगः अयुक्तः । ’ग्रामप्रदेशे’ इति, ’अमुकग्रामजनपदे’ इति वा प्रयोक्तव्यम् । ग्रामान्तरं भवति अन्यः ग्रामः । अन्यस्मिन् ग्रामे वसामि इत्यर्थः अत्र न विवक्षितः । केषाञ्चित् नाम्नाम् एव जनपदाः (जिल्लाः) अपि भवन्ति । तादृशे वसन् कश्चित् उपर्युक्तं वचनं वदति । अतः, अत्र ग्रामान्तरशब्दः परिहरणीयः । तत् जिल्लाक्षेत्रं सूचयितुं समुचितं पदान्तरं प्रयोक्तव्यम् ।

४४. येन **सम्मानम्** अवमानं च समानतया दृश्यते सः समदर्शी ।

’सम्मानः अवमानः च’ इति प्रयोक्तव्यम् ।

सम्मानावमानौ पुंलिङ्गे एव । ’गर्वोऽभिमानोऽहङ्कारः’ इति अमरकोषः अत्र प्रमाणम् । (सम्मानावमानयोः उपसर्गभेदः, प्रत्ययः तु समानः) अनयोः एव अर्थयोः सम्माननम् इति, अवमाननम् इति च ल्युडन्तरूपम् अपि अस्ति । ल्युडन्तं च नपुंसकम् । अपमानशब्दः अपि कश्चन अस्ति । अवमानः इत्येव अर्थः अस्ति ।

४५. **भारतम् इदम् एकम्** । अत्र विघटनं कदापि न भवेत् ।

’भारतम् इदम् अखण्डम्’ इति प्रयोक्तव्यम् । ’एकम्’ इति पदम् एकत्वं द्योतयति, तन्नाम द्वित्वादिकं निवारयति । भारतस्य एकत्वं तु स्वतः सिद्धम् एव । प्रकृतवाक्ये अखण्डत्वं हि विवक्षितं, न तु एकत्वम् । ’एक’शब्दस्य अखण्डार्थप्रतिपादकत्वं कुत्रापि न दृष्टचरम् । अतः, ’भारतम् इदम् अखण्डम्’ इति प्रयोगः एव उचितः ।

४६. पण्डिताः भवन्तः कुत्र, पामराः वयं कुत्र ?

’भवन्तः क्व, वयं क्व’ इति प्रयोगः एव उचितः स्यात् ।

महदन्तरं यदा द्योतयितुम् इष्यते तदा उभौ क्वौ प्रयुज्येते । तथा च वचनम् – ’द्वौ क्वौ महदन्तरं सूचयतः’ इति । प्राचीनप्रयोगः यथा –

- क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः । - रघु १.२
- क्व वयं क्व परोक्षमन्मथो....... – शाकुन्तलम् – २.१८

एतस्मिन् एव अर्थे द्वयोः ’कुत्र’पदयोः प्रयोगः न दृष्टपूर्वः । अतः एव चारुदेवशास्त्रिणः वदन्ति – ’द्वौ क्वौ महदन्तरं सूचयतः । तत्कस्मात् इति चेत् । व्यवहारे परतन्त्राः वयं, न स्वतन्त्राः’ इति ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

४७. **कुत्र कुत्र** शक्यं **तत्र सर्वत्र** अहं संस्कृतेन वदामि ।

'**यत्र यत्र** शक्यं तत्र सर्वत्र' इति प्रयोक्तव्यम् । यत्तच्छब्दाभ्यां यः अर्थः अवगम्यते तं द्योतयितुम् इच्छति वक्ता । यच्छब्दस्थाने किंशब्दः प्रयुक्तः अस्ति तेन । अयं प्रयोगः अपेक्षितम् अर्थं न अवगमयति । अधिकरणजिज्ञासाभ्यां 'कुत्र' इत्येतत् प्रयुज्यते । अत्र तादृशी जिज्ञासा नास्ति । अतः अत्र यच्छब्दः एव प्रयोक्तव्यः ।

४८. **काया** वाचा मनसा अहं देशसेवां करोमि ।

'**कायेन**' इति प्रयोक्तव्यम् । 'काया' इति रूपम् असाधु । देहपर्यायः कायशब्दः पुंसि । सः अकारान्तः । तस्मात् तृतीयाविभक्तौ तस्य रूपं भवति – 'कायेन' इति । अतः, 'काया' इति प्रयोगः भ्रान्त्या एव ।

४९. संस्कृतभाषायाः **उगमः** कदा अभूत् इति केनापि न ज्ञायते ।

'उगमः' इति अपशब्दः । '**उद्गमः**' इति, '**उत्पत्तिः**' इति प्रयोक्तव्यम् । 'उद्गमः' इत्यत्र उदुपसर्गपूर्वकस्य गम्-धातोः भावे अप् । 'उत्पत्तिः' इत्यत्र अपि उपसर्गः उत् एव । पत्-लृधातोः क्तिन् तत्र । उभयत्रापि अर्थः समानः । 'उ' इति उपसर्गः न कोऽपि अस्ति, येन धातोः पूर्वं तस्य प्रयोगः स्यात् । उपसर्गस्तु 'उत्' इति । अतः उत्पूर्वकः गम्-धातुः पत्लृधातुर्वा प्रयोक्तव्यः उत्पत्त्यर्थे ।

सुबन्ताः

५०. 'किमर्थम् आगतम्' इति पृष्टे तेन उक्तं – '**तूष्णीम् आगतम्**' इति । '**निष्कारणम्** आगतम्','**विशेषकारणं विनैव** आगतम्' इत्यादीनि वाक्यानि प्रयोक्तव्यानि ।

अत्र तूष्णीम् इति पदम् अस्थाने । तूष्णीम् इति मौनार्थकम् अव्ययम् । तथा हि अमरः – 'मौने तु तूष्णीं तूष्णीकाम्' इति । मौनं नाम निर्वचनस्थितिः । प्रकृतवाक्ये निर्वचनस्थितेः सवचनस्थितेः वा जिज्ञासा नास्ति । कारणजिज्ञासा अत्र । अतः, उत्तररूपेण निष्कारणादयः शब्दाः प्रयोक्तव्याः ।

प्रादेशिकभाषायां केषाञ्चित् पदानाम् अर्थद्वयं भवति । प्रसङ्गानुगुणं स स अर्थः अवगम्यते । अर्थसूक्ष्मताम् अजानानाः केचन सर्वत्रापि एकमेव पदं प्रयुज्यते अनुवादाद्यवसरे ।

सुबन्ताः

५१. सभायाम् अतिथिं परिचाययता कार्यकर्त्रा उक्तं – **'भवन्तः महान्तः कवयः'** इति ।

'एषः महाकविः' इति वाक्यविन्यासः वरं स्यात् ।

परिचयकथनसमये अङ्गुलिनुर्देशपूर्वकं हिन्दीभाषया उच्यते 'आप्' इति । सा तु हिन्दीशैली । संस्कृतशैली ततः भिन्ना । सन्निकृष्टस्य जनस्य निर्देशाय एतदादयः शब्दाः प्रयुज्यन्ते, न तु भवच्छब्दः । अतः, 'एषः' इति प्रयोगः एव उक्तः । आदरार्थे सर्वत्र बहुवचनान्तप्रयोगः अपि न युक्तः । प्रादेशिकभाषायां तु आदरद्योतनाय बहुवचनान्तता एव प्रयुज्यते । संस्कृतभाषायां तु वर्यमान्यादयः आदरसूचकाः शब्दाः । एकवचनान्तं तान् (आदरार्हान्) अपि निर्दिशति एव । अतः, आदरद्योतनाय वर्यमहोदयादीनां प्रयोगपुरस्सरम् एकवचनान्तप्रयोगः न दोषाय सर्वथा ।

सुबन्ताः

५२. **तत्रभवन्तो भवन्तः** सर्वे प्रणम्यन्ते अस्माभिः । **’तत्रभवन्तः सर्वे’** इति प्रयोगः प्रशस्ततरः ।

’तत्रभवन्तः’ ’अत्रभवान्’ इत्यादयः पदसमुदायाः पूज्यवचनाः । ’तत्र’पदसन्निधाने पूज्यार्थाभिधानेऽपि भवच्छब्दः सर्वनामत्वं तु न जहाति । अतः एव नाटकादिषु तत्रभवच्छब्दस्य अनन्तरं नाम्नः एव प्रयोगो दृश्यते ।

यथा – ’तत्रभवान् कालिदासः आह....’ इत्येवम् ।

किन्तु, ’तत्रभवन्तो भवन्तः’ इत्येषा आनुपूर्वी तु प्राचुर्येण दृश्यते लोके । तस्मात् करिकलभादिषु यथा तथैव तत्रभवच्छब्दस्य पूज्यार्थमात्राभिधायकत्वम् इति अभिप्रयन्ति वैयाकरणाः । अतः, ’तत्रभवन्तो भवन्तः इति प्रयोगः अशुद्धः’ इति वक्तुं न शक्यते । अप्रशस्तता इति आरोप्यते कैश्चित् ।

सुबन्ताः

५३. **वराकेन** तेन महत् कष्टम् अनुभूतम् ।

’वराकेन’ इति अशुद्धम् । ’**वराकेण**’ इति वक्तव्यम् ।

णत्वस्य निमित्तं रेफः, षकारः, ऋकारः च । रेफषकारयोः परः ऋकारात् परश्च नकारः णत्वं प्राप्नोति । ’रषाभ्यां नो णः समानपदे’ (पा.सू. ८.४.१) इति सूत्रम्, ऋवर्णान्तस्य णत्वं वाच्यम्’ इति वार्तिकं च अत्र प्रमाणम् ।

निमित्तनकारयोः मध्ये अट्कुप्वादयः सन्ति चेदपि णत्वं प्रवर्तते – ’अट्कुप्वाङ्नुम्व्यवायेऽपि’ (पा.सू. ८.४.२) इति सूत्रेण । ’वराकेण’ इत्यत्र निमित्तस्य रेफस्य अनन्तरं आकार-ककार-एकाराः सन्ति । अतः, णत्वं प्रवर्तते एव । तच्च णत्वं नित्यम् । अतः, ’वराकेण’ इत्येव प्रयोक्तव्यम् ।

vyoma ॥ वाचं धेनुमुपासीत ॥ Saṃskṛtam · Value Education · Technology

एतादृशानि अन्यानि उदाहरणानि यथा –

अशुद्धम्	शुद्धम्
शुष्कानि	शुष्काणि
वैशेषिकानाम्	वैशेषिकाणाम्
वृषभानाम्	वृषभाणाम्
निरूपकेन	निरूपकेण
द्रवद्रव्येन	द्रवद्रव्येण
विश्वासार्हानाम्	विश्वासार्हाणाम्
पितृव्यानाम्	पितृव्याणाम्
क्षत्रियानाम्	क्षत्रियाणाम्
तक्षकेन	तक्षकेण
त्रिवर्षीयेन	त्रिवर्षीयेण
मनुष्येन	मनुष्येण

५४. विषयेऽस्मिन् **विमर्शकाणाम्** आशयः अन्यः एव अस्ति ।

'**विमर्शकानाम्**' इति वक्तव्यम् । णत्वम् अत्र न सम्भवति । अत्र णत्वस्य निमित्तं रेफः । रेफनकारयोः मध्ये शकारः अपि अस्ति । स च णत्वस्य बाधकः । अतः, अत्र णत्वं न भवति । एतादृशानि सन्ति बहूनि उदाहरणानि । अतः, निमित्तनकारयोः मध्ये विघ्नकारकाः वर्णाः सन्ति किम् इति परिशील्य एव णत्वं कर्तव्यम् । एतादृशानि अन्यानि उदाहरणानि यथा –

अशुद्धम्	**शुद्धम्**
कार्यदर्शिणा	कार्यदर्शिना
राजकीयेण	राजकीयेन
प्रतिमाणाम्	प्रतिमानाम्
नर्तकाणाम्	नर्तकानाम्
अर्चकेण	अर्चकेन
चर्च्यमाणः	चर्च्यमानः
दृश्यमाणम्	दृश्यमानम्

५५. केनचित् महानुभावेन '**सीतायणम्**' इति ग्रन्थः लिखितः ।

'**सीतायनम्**' इति प्रयोक्तव्यम् । 'सीतायणम्' इति अपशब्दः । णत्वप्राप्तेः निमित्तः भवति रेफः षकारः वा । अट्कुप्वादीनां व्यवधाने सत्यपि णत्वं भवति निमित्ते सति । निमित्ताभावे तु णत्वं कथमपि न भवति । सूर्यस्यैव अभावे सूर्यकिरणानां प्रसक्तिः कथम् ? 'सीतायणम्' इत्यत्रापि एषैव गतिः । णत्वनिमित्तभूतः रेफः षकारः वा नास्ति अत्र । तस्मात्, 'सीतायनम्' इत्येव रूपम् । णत्वप्रकरणम् अपरिशीलितवद्भिः प्रयुज्येत 'सीतायणम्' इत्यादीनि पदानि ।

एतादृशानि कानिचन उदाहरणानि यथा –

अशुद्धम्	**शुद्धम्**
अनुधाव्यमाणः	अनुधाव्यमानः
चिन्त्यमाणे	चिन्त्यमाने
शशाङ्केण	शशाङ्केन
माण्डलिकाणाम्	माण्डलिकानाम्
उट्टङ्कणम्	उट्टङ्कनम्

५६. **दौर्भाग्येन** मया णत्वविषये अधिकं न ज्ञायते ।

’**दौर्भाग्येण**’ इति प्रयोक्तव्यम् । ’दौर्भाग्येन’ इति अपशब्दः ।

निमित्तस्य सद्भावे उत्तरपदे यदा कवर्गः भवति तदा (प्रातिपदिकान्तनुम्विभक्तिषु) णत्वं नित्यम् । ’कुमति च’ (पा.सू. ८.४.१३) इति सूत्रम् ।

अतः ’दौर्भाग्येण’ इति रूपम् एव प्रयोक्तव्यम् ।

विस्तरः तु एषः –

यत्र खण्डद्वयं भवति (व्रीहिवापिणा इत्यादिषु) तत् सखण्डं पदम् इति उच्यते । तत्र निमित्तं पूर्वपदे, नकारश्च उत्तरपदे यदा भवति तदा ’प्रातिपदिकान्त...’ इति सूत्रेण विकल्पेन णत्वम् । (स च नकारः प्रातिपदिकान्ते स्थितः, विभक्तिसम्बद्धः, नुम्सम्बद्धः वा भवेत् इति नियमः) यदि उत्तरपदं कवर्गवत् (’कु’मत्) भवति तदा णत्वं नित्यं ’कुमति च’ इति सूत्रेण ।

अन्यानि उदाहरणानि यथा –

अशुद्धम्	शुद्धम्
शुष्कमेघानाम्	शुष्कमेघाणाम्
चक्रवाकेन	चक्रवाकेण
वर्षभोगिना	वर्षभोगिणा
रविमयूखेन	रविमयूखेण
वरयुवकानाम्	वरयुवकाणाम्
गिरिगुहानाम्	गिरिगुहाणाम्

५७. सः **नियमिततया** योगासनकक्ष्यां गच्छति ।

’नियमिततया’ इति शब्दः अस्थाने । ’**नियततया**’ इति प्रयोक्तव्यम् । ’नियमितः’ इत्यत्र इतच्-प्रत्ययः वक्तव्यः स्यात् । ’तदस्य सञ्जातं तारकादिभ्यः इतच्’ (पा.सू. ५.२.३६) इति हि सूत्रम् । ’नियमयुक्तः’ इति तात्पर्यं भवति । ’नियमयुक्तता’ अत्र न विवक्षिता । ’सातत्येन’ इत्यर्थः अत्र अपेक्षितः । तम् अवगमयितुम् अर्हति ’नियत’शब्दः । अतः, ’नियततया’ इति प्रयोगः एव औचित्यम् आवहति अत्र ।

५८. **आगतवतेभ्यः** सर्वेभ्यः धन्यवादाः समर्प्यन्ते ।

’आगतवतेभ्यः’ इति अपशब्दः । ’**आगतवद्भ्यः**’ इति वक्तव्यम् । ’आगतवद्भ्यः’ इत्यस्य प्रातिपदिकम् ’आगतवत्’ इति । तकारान्तः शब्दः सः। ’बहुवचने झल्येत्’ (पा.सू. ७.३.१०३) इति एकारः अदन्ताङ्गस्य विहितः, न तु तकारान्तस्यापि । अतः अत्र एकारश्रवणं नास्ति । आगतवत् + भ्यस् इति स्थिते सन्धिकार्ये रुत्वविसर्गे च ’आगतवद्भ्यः’ इति रूपम् । ’आगतवतेभ्यः’,’आगतवतानाम्’ इत्यादयः तु बालिशाः प्रयोगाः ।

सुबन्ताः

५९. अद्य मन्त्रिमण्डलस्य **पुनर्रचना** विहिता ।

‘पुनर्रचना’ इति अपशब्दः । ’**पुनारचना**’ इति वक्तव्यम् ।

पुनर् इति रेफान्तम् अव्ययम् । रचनाशब्दः रेफादिः । पुनर् + रचना इत्यत्र रेफात् रेफः परः अस्ति । रेफस्य रेफे परे लोपः ’रो रि’ (पा.सू. ८.३.१४) इति सूत्रेण । लोपे कृते पूर्वस्य अकारस्य दीर्घः ’ढ्रलोपे पूर्वस्य दीर्घोऽणः’ (पा.सू. ६.३.१११) इति सूत्रेण । तदा तु ’पुनारचना’ इति रूपम् । ’पुनर्रचना’ इति रूपं प्रादेशिकभाषासु प्रयुज्यते । असंस्कृतं रूपं तत् ।

अन्यानि उदाहरणानि यथा –

पुनः + रोषः = पुनारोषः

अन्तः + राज्यीयम् = अन्ताराज्यीयम्

पुनः + रूपम् = पुनारूपम्

एवमेव नीरोगता (निर् + रोगता) , नीरसः (निर् + रसः) , धनूराशिः (धनुस् + राशिः) इत्यादयः अपि ।

६०. तस्य नायकस्य **महानता** जनैः न ज्ञाता एव ।

’महानता’ इति अपशब्दः । ’**महत्ता**’ इति प्रयोक्तव्यम् ।

वक्ता अत्र भाववाचकं ’ता’प्रत्ययं कर्तुम् इच्छति । स च प्रत्ययः प्रातिपदिकात् भवति । ’महान्’ इत्यस्य प्रातिपदिकं ’महत्’ इति । तस्य ’ता’प्रत्यये ’महत्ता’ इति रूपम् । प्रथमान्तात् ’ता’प्रत्ययः न भवति । अतः, ’महानता’ इति रूपम् अपि न भवति ।

६१. एतत् पत्रं भवतः **अवगाहनाय** प्रेष्यते ।

’अवगाहनाय’ इति प्रयोगः अस्थाने । ’**विषयज्ञापनाय** भवते प्रेष्यते’ इति, भङ्ग्यन्तरेण वा प्रयोक्तव्यम् ।

अवगाहनं नाम अवतरणम्, अन्तःप्रवेशः वा । स च अर्थः अत्र न अभिप्रेतः । परिशीलनं, ज्ञापनम्, अवधानाकर्षणं वा अत्र अपेक्ष्यते । अतः, तदनुगुणः वाक्यप्रयोगः एव करणीयः । प्रादेशिकभाषासु अवगाहनपदस्य परिशीलनाद्यर्थाः स्युः नाम । संस्कृते तु तादृशस्य अर्थस्य द्योतनसामर्थ्यं तस्य पदस्य नास्ति ।

सुबन्ताः

६२. कार्यक्र**मोपरान्तं** सः गृहं गतवान् ।

'उपरान्त'शब्दः न संस्कृतः । '**कार्यक्रमानन्तरम्**' इति प्रयोक्तव्यम् । प्रादेशिकभाषायां योऽयम् उपरान्तशब्दः श्रूयते सः न संस्कृतशब्दः । संस्कृताभासः सः । अतः, तस्य प्रयोगः सर्वथा परिहरणीयः ।

६३. आश्रमे जनानाम् **आवागमनं** विशेषतः दृश्यते ।

'आवागमनम्' इति अपशब्दः । '**गमनागमनम्**' इति प्रयोक्तव्यम् । प्रकृतवाक्ये (जनानां) गमनम् आगमनं च वक्तुम् इष्टम् । तम् अर्थं बोधयितुम् 'आवागमनम्' इति शब्दः न समर्थः । आवागमनम् इत्यत्र आ + अव + आ इत्येतेषाम् उपसर्गाणां सद्भावः वक्तव्यः भवेत् । तावता अपि अपेक्षितस्य अर्थस्य अभिव्यञ्जने तत् पदं न समर्थम् । अतः तस्य पदस्य प्रयोगस्य त्यागः एव श्रेयसे ।

६४. भारतेन ’**क्षिपणिः**’ सज्जीकृता अस्ति ।

’क्षिपणिः’ इत्यस्य परिहारः वरम् । ’**क्षेपणी**’ इति प्रयोक्तव्यम् । क्षिप्धातोः करणार्थे ल्युट्-प्रत्ययः ’करणाधिकरणयोश्च’ (पा.सू. ३.३.११७) इति सूत्रेण । ल्युटः टित्त्वात् ’टिड्ढाणञ्..’ इति सूत्रेण ङीप् । ’पुगन्तलघूपधस्य च’ (पा.सू. ७.३.८६) इति सूत्रेण गुणः । तस्मात् ’क्षेपणी’ इति रूपम् ।

’संज्ञापूर्वको विधिः अनित्यः’ इति परिभाषायाः आधारेण गुणविधेः अनित्यत्वम् अङ्गीकृत्य गुणाभावयुक्तं ’क्षिपणी’ इति रूपं समर्थयितुं शक्यं, यदि प्रामाणिकः प्रयोगः दृष्टः स्यात् । तादृशस्य अदर्शनात् ’क्षेपणी’ इति प्रयोगः एव वरम् ।

॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

६५. **पत्रवितरकः** पत्राणि वितरति ।

‘**वितारकः**’ इति प्रयोक्तव्यम् ।

’ण्वुल्-तृचौ’ (पा.सू. ३.१.१३३) इति सूत्रेण ण्वुलि ’इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन’ (वा. ७.१.१०२) इति वृद्धिः । तस्मात्, (वि)तारकः इति रूपम् । ण्वुलि तरकः इति रूपं तु न भवति । ’वितारकः’ इत्येव प्रयोक्तव्यम् ।

अथवा, यदि ’वितरकः’ इत्यपि साधनीयः एव इत्याग्रहः तर्हि तर्हि एवं व्युत्पाद्यताम् -

(वि)तरतीति (वि)तरः । पचाद्यच् । (वि)तरः एव (वि)तरकः इति स्वार्थे कप्रत्ययः ।

एतदत्र स्मर्तव्यं यत् स्थितस्य गतेः चिन्तनाय दर्शितः मार्गः एषः । प्रामाणिकप्रयोगाभावे तु अस्माभिः क्रियमाणः ’वितरक’शब्दस्य प्रयोगः एव अनुचितः स्यात् ।

६६. सः **चलचित्रं** द्रष्टुं गतवान् ।

'**चलचित्रम्**' इति रूपं साधु एव । एतस्मिन् एव अर्थे '**चलच्चित्रम्**' इति, '**चलनचित्रम्**' इति वा अपि प्रयोक्तुं शक्यम् । यत् चित्रं चलं (चञ्चलं) भवति तत् 'चलचित्रम्' । 'चलं लोलं चलाचलम्' इति हि अमरः । यत् चित्रं चलत् भवति तत् 'चलच्चित्रम्' । कर्मधारयसमासः अत्र । चलनोपेतं चित्रं चलनचित्रम् । अतः त्रीणि अपि रूपाणि साधूनि एव ।

६७. सः **तैत्तरीयोपनिषदं** पठति ।

'तैत्तरीयम्' इति अपशब्दः । '**तैत्तिरीयम्**' इति प्रयोक्तव्यम् । तित्तिरिः नाम कश्चन ऋषिः । तत्सम्बद्धं तैत्तिरीयम् । यदि ऋषेः नाम तैत्तरिः इति स्यात्, तर्हि तैत्तरीयम् इति शब्दः साधुः स्यात् । किन्तु, तन्नामकः ऋषिः नास्ति । ऋषेः नाम तु 'तित्तिरिः' इति । तस्मात्, 'तैत्तिरीयम्' इति शुद्धम् ।

सुबन्ताः

६८. पुनश्चिन्तनाय एषः **सकालः** ।

’सकालः’ इति प्रयोगः अस्थाने । ’**सुकालः**’ इति, ’**योग्यः कालः**’ इति वा प्रयोक्तव्यम् ।

’सकालः’ इत्यस्य अर्थः भवेत् कालेन सहितः इति । कालसहितत्वं नात्र अभिप्रेतम् । शोभनः/योग्यः कालः अभिप्रेतः । अतः, तदनुगुणः एव पदप्रयोगः अत्र करणीयः ।

’सकालः’ इति प्रादेशिकभाषायां प्रयुज्यते । तत् अनुकुर्वद्भिः औचित्यम् अचिन्तयद्भिः कैश्चित् सुकालार्थे ’सकाल’शब्दः प्रयुज्येत । स च दोषाय एव ।

६९. सः भिक्षुकः **सदृढः** दृश्यते ।

’सदृढः’ इति अस्थाने । ’**सुदृढः**’ इति ’**दृढकायः**’ इति वा प्रयोक्तव्यम् ।

‘सदृढ’पदस्य अर्थः भवति – ’दृढेन सहितः’ इति । दृढकायत्वम् अत्र इष्यते । अतः, तदनुगुणः एव पदप्रयोगः अत्र औचित्यम् आवहति ।

सुबन्ताः

७०. सः एतत् कार्यं कर्तुं **सक्षमः** अस्ति ।

’सक्षमः’ इति अस्थाने । ’**क्षमः**’ इत्येतावता एव अलम् ।

’क्षमः’ नाम समर्थः । ’सः कार्यकरणे समर्थः अस्ति’ इत्येषः अर्थः अत्र विवक्षितः । तं गमयितुं ’क्षम’शब्दः समर्थः । ’सक्षमः’ नाम ’क्षमेण (समर्थेन) सहितः’ । अत्र तु समर्थः एव विवक्ष्यते, न तु समर्थेन सहितः कश्चित् अन्यः । तस्मात्, क्षमशब्दप्रयोगमात्रं पर्याप्तम् । ’सक्षम’शब्देन नार्थः ।

एवमेव ’सशक्त’प्रभृतयः अपि । ’शक्तः’ इत्यनेनैव इष्टसिद्धिः । ’स’ इत्यस्य योजनं न आवश्यकम् ।

७१. एतादृशः **दृष्टिकोणः** न युक्तः ।

’दृष्टिकोणः’ इति अस्थाने । ’**दृष्टिः**’ इति, **’चिन्तनम्’** इति वा प्रयोक्तव्यम् । दृष्टिः नाम दर्शनं ज्ञानं वा । कोणशब्दस्य गृहादीनाम् एकदेशः, दिशोः विदिशोः वा मध्यभागः, रेखयोः सन्धिस्थानम् इत्यादयः अर्थाः । प्रकृतवाक्ये ’कोण’शब्दवाचकस्य अर्थस्य न कापि प्रसक्तिः । चिन्तनस्य (ज्ञानस्य वा) अयुक्तता वक्तुम् इष्यते । तदर्थं ’दृष्टिशब्दप्रयोगमात्रं पर्याप्तम् । कोणशब्दस्य प्रयोगः अत्र न आवश्यकः ।

QUESTIONS/DOUBTS?

Email us @

sanskritfromhome@vyomalabs.in

For downloading course-materials, login @
www.sanskritfromhome.in

Subscribe to our youtube channel @
vyoma-samskrta-pathasala

Buy our Samskrita-learning products @
www.digitalsanskritguru.com

Support our cause for Samskrita-Samskriti @
www.vyomalabs.in

vyoma ॥ वाचं धेनुमुपासीत ॥
Saṃskṛtam · Value Education · Technology

© All the content in this presentation is the intellectual property of Vyoma Linguistic Labs Foundation.
All materials shared in our website are purely for the purpose of personal study.
Replication/reuse in any form without written permission from the organisation is prohibited.